International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(1): 313-317
© 2022 IJSR
www.anantaajournal.com
Received: 09-10-2021
Accepted: 13-11-2021

**डॉ. सीमा जैन**
सहा.आचार्य, सामान्य संस्कृत, राज.महाराज आचार्य संस्कृत महाविद्यालय, जयपुर, राजस्थान, भारत

**Corresponding Author:**
**डॉ. सीमा जैन**
सहा.आचार्य, सामान्य संस्कृत, राज.महाराज आचार्य संस्कृत महाविद्यालय, जयपुर, राजस्थान, भारत

# शिशुपालवधमहाकाव्ये प्रकृतिचित्रणम्

**डॉ. सीमा जैन**

## प्रस्तावना

भारतीयसंस्कृतिः प्रकृतेरङ्के विकसिता। मानवजीवनस्य सिद्धान्ताः प्राकृतिकवातावरणे एव सम्पुष्टाः। अत एव साहित्येऽपि प्रकृतिचित्रणमावश्यकाङ्गत्वेन स्वीकृतम्। महाकविमाघेनापि शिशुपालवधमहाकाव्ये प्रकृतेः चारुचित्रणं कृतम्। तृतीयसर्गे समुद्रवर्णनम् , चत ुर्थसर्गे रैवतकपर्वतवर्णनम्षष्ठसर्गे षण्णामृत ,ूणां वर्णनम्सप्तमे , नवमसर्गे सूर्यास्तस्य सन्ध्यायाः ,अष्टमे जलविहारस्य वर्णनम् ,वनविहारवर्णनम् चन्द्रोदयस्य च वर्णनम्एकादशे , सूर्योदयवर्णनप्रभातवर्णनञ्च प्रकृतेः साक्षात् चित्राणि सन्ति।

समुद्रस्य सुन्दरं चित्रं यथा –

पीत्वा जलानां निधिनाऽतिगाध्र्याद् वृद्धिं गतेऽप्यात्मनि नैव मान्तीः।
क्षिप्ता इवेन्दोः स रुचोऽधिवेलं मुक्तावलीराकलयाञ्चकार।।[1]

जलानां निधिना समुद्रेण गर्ध एव गाध्र्यम् ,तदतिमात्रमतिगाध्र्यं तस्मात् , तृष्णाभरादित्यर्थः। पीत्वा। अथ वृद्धिं गते आत्मनि देहे। चन्द्रोदये समुद्रस्य वृद्धिरित्यागमः। नैव मान्तीरमान्तीःअतिरिच्यमाना इत्यर्थः। क्षिप्ता उद्गीर्णा , अतितृष्णयोत्कटं पीत्वा अन्तरमानद्बहिरुद्वान्ता इत्यर्थः। इन्दो रुचो मरीचीरिवेत्युत्प्रेक्षा। स हरिरधिवेलमधितीरम्। मुक्तावलीराकलयाञ्चकाराकलयामास।

चतुर्थसर्गे रैवतकपर्वतस्य सुन्दरं चित्रमुपस्थापितं कविना। रैवतकपर्वतस्य तुलना –तलतानां वर्णनं कुर्वन्नाहसर्पाणां निश्वासधूमेन कृता। रैवतकपर्वतस्थि

क्रान्तं रुचा काञ्चनवप्रभाजा नवप्रभाजालभृतां मणीनाम्।
श्रितं शिलाश्यामलताभिरामं लताभिरामन्त्रितषट्पदाभिः।।[2]

रैवतके हिरण्यगर्भस्य शिवस्य च दर्शनं करोति कविः। रैवतकपर्वते स्थितानां रत्नानां वर्णनं कृतम्। इहाद्रौ रात्रावपि कमलिन्यो विकसिताः तिष्ठन्ति –

भिन्नेषु रत्नकिरणैः किरणेष्विहेन्दोरुच्चावचैरुपगतेषु सहस्रसंख्याम्।
दोषापि नूनमहिमांशुरसौ किलेति व्याकोशकोकनदतां दधते नलिन्याः।।[3]

षष्ठे सर्गे कविना ऋतूणां वर्णनं कृतम्। रैवतकपर्वते सदैव षण्णामृतूणां स्थितिः। वसन्तस्य स्वाभाविकचित्रं यथा –

नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः।।[4]

मलयाचलस्य पवनं सुन्दरीणां स्वेदं परिमार्ष्टि। कुरबकस्तबकस्थितस्य भ्रमरस्य शोभा श्रीकृष्णाङ्गनानां तारकतुल्या। वसन्तर्तौ अशोकपुष्पः चम्पकश्च प्रादुर्भवतः। वर्षर्तौ इन्द्रचापवलयस्य शोभा वर्णिता –

अनुययौ विविधोपलकुण्डलद्युतिवितानकसंवलितांशुकम्।
धृतधनुर्वलयस्य पयोमुचः शबलिमा बलिमानमुषो वपुः।।[5]

धृतधनुर्वलयस्य धृतेन्द्रचापमण्डलस्य पयोमुचो मेघस्य शबलिमा विचित्रता विविधमणियुतकुण्डलधारिणः श्रीकृष्णस्य तुल्या। शरदृतुचित्रणं यथा –

स्मितसरोरुहनेत्रसरोजलामतिसिताङ्गविहङ्गहसद्दिवम्।
अकलयन् मुदितामिव सर्वतः स शरदं शरदन्तुरदिङ्मुखाम्।।[6]

स हरिः स्मितानि विकसितानि सरोरुहाण्येव नेत्राणि येषु तानि सरोजलानि यस्यां तां तथोक्तामतिसिताङ्गा धवलपक्षा ये विहङ्गा हंसास्तैर्हसन्ती स्मयमानेव स्थिता द्यौर्यस्यां तां तथोक्तां शरैस्तृणविशेषैर्दन्तुराण्युन्नतदन्तानि। हासात्प्रकाशदशनानीति यावत्। तानि दिङ्मुखानि यस्यां तां शरदन्तुरदिङ्मुखां शरदं सर्वतो मुदितामिवाकलयत्। नवमसर्गे सूर्यास्तस्य यथार्थचित्रं प्रस्तौति महाकविः। दिनस्य उपमा वृद्धपुरुषेण कृता –

विरलातपच्छविरनुष्णवपुः परितो विपाण्डु दधदभ्रशिरः।
अभवद् गदतः परिणतिं शिथिलः परिमन्दसूर्यनयनो दिवसः।।[7]

अस्तोन्मुखसूर्यस्य कान्तिवर्णनं यथा –

गतवत्यराजत जपाकुसुमस्तबकद्युतौ दिनकरेऽवनतिम्।
बहलानुरागकुरुविन्ददलप्रतिबद्धमध्यमिव दिग्वलयम्।।[8]

जपाकुसुमस्तबकद्युतौ लोहितवर्णे दिनकरेऽवनतिमस्ततां गतवति सति दिग्वलय दिङ्मण्डलं कङ्कणं च ध्वन्यते। बहलानुरागैः सान्द्ररागैः कुरुविन्ददलैः पद्मरागशकलैः प्रतिबद्धः प्रत्युप्तो मध्यो यस्य तदिवाराजत। एवमेव समुद्रे अर्धमग्नः सूर्यः कीदृशः प्रतीयते इति द्रष्टव्यम् –

द्रुतशातकुम्भनिभमंशुमतो वपुरर्धमग्नवपुषः पयसि।
रुरुचे विरञ्चिनखभिन्नबृहज्जगदण्डकैकतरखण्डमिव।।[9]

सन्ध्याया वर्णनं कुर्वन्नाह कविः –

अविभाव्यतारकमदृष्टहिमद्युतिबिम्बमस्तमितभानु नभः।
अवसन्नतापमतमिस्त्रमभादपदोषतैव विगुणस्य गुणः।।[10]

चन्द्रोदयस्य चित्रणं करोति कविः –

उदमज्जि कैटभजितः शयनादपनिद्रपाण्डुरसरोजरुजा।
प्रथमप्रबुद्धनदराजसुतावदनेन्दुनेव तुहिनद्युतिना।।[11]

अपनिद्रपाण्डुरसरोजरुजा विकसितसितपुण्डरीकश्रिया तुहिनद्युतिना चन्द्रेण प्रथमं हरेः पूर्वमेव प्रबुद्धाया नदराजसुतायाः सिन्धुकन्यायाः श्रियो वदनेन्दुनेव कैटभजितो हरेः शयनात् समुद्राद् उदमज्जि उन्मग्नम् उत्थितमित्यर्थः। एकादशसर्गे प्रभातवर्णनप्रसङ्गे चन्द्रास्तं वर्णयति कविः –

नवकुमुदवनश्रीहासकेलिप्रसङ्गादधिकरुचिरशेषाम प्युषां जागरित्वा।
अयमपरदिशोऽङ्के मुञ्चति स्त्रस्तहस्तः शिशयिषुरिव पाण्डुं म्लानमात्मानमिन्दुः।।[12]

अयमिन्दुः कुमुदवनशोभायामासक्तो भूत्वा सकलामपि रात्रिं जागरित्वा प्रातःकाले शयनार्थं पश्चिमदिशोऽङ्के स्वशरीरं मुञ्चति। दक्षिणनायकः कयाचित्सह विहृत्य श्रान्तः कस्याश्चिदङ्के शेते तद्वदिति भावः। प्रभातकालस्य स्वाभाविकं चित्रं प्रस्तौति महाकविः –

विततपृथुवरत्रातुल्यरूपैर्मयूखैः
कलश इव गरीयान्दिग्भिराकृष्यमाणः।
कृतचपलविहङ्गालापकोलाहलाभि-
र्जलनिधिजलमध्यादेष उत्तार्यतेऽर्कः।।[13]

सूर्योदयस्य दृश्यं यथा –

पयसि सलिलराशेर्नक्तमन्तर्निमग्नः
स्फुटमनिशमतापि ज्वालया वाडवाग्नेः।
यदयमिदमिदानीमङ्गमुद्यन्दधाति
ज्वलितखदिरकाष्ठाङ्गारगौरं विवस्वान्।।[14]

अयं विवस्वान् नक्तं सलिलराशेः पयसि निमग्नोऽन्तर्वाडवाग्नेर्ज्वालया- निशमतापि। यदिदानीमुद्यन् इदं ज्वलितः प्रज्वलन् यः खदिरकाष्ठस्याङ्गारः तद्वद्गौरमरुणमङ्गं दधाति। नदीनां प्रातःकालिकी शोभा दर्शनीया –

परिणतमदिराभं भास्करेणांशुबाणै-
स्तिमिरकरिघटायाः सर्वदिक्षु क्षतायाः।
रुधिरमिव वहन्त्यो भान्ति बालातपेन
च्छुरितमुभयरोधोवारितं वारि नद्यः।।[15]

नद्यः बालातपेन च्छुरितं रूषितम् अत एव परिणतमदिराभं सुपक्वसुरासंनिभमुभाभ्यां रोधोभ्यां वारितमवरुद्धमुभयरोधोवारितं वारि जलं भास्करेण अंशुभिरेव बाणैः सर्वदिक्षु क्षतायाः प्रहृतायास्तिमिरमेव करिघटा गजसङ्घस्तस्या रुधिरमेव वहन्त्यो भान्ति।।
एवं शिशुपालवधमहाकाव्ये कविना प्रकृत्याः सुन्दरं चित्रमुपस्थापितम्।

**प्रकृत्या मानवीकरणम्**

महाकविमाघेन शिशुपालवधे बहुमुखी प्रतिभा प्रदर्शिता। अस्मिन्नेव क्रमे कविना प्रकृत्या मानवीकरणस्य सुन्दरं दृश्यमुपस्थापितम्। द्वारिकानगरी समुद्रस्य कन्यारूपेण चित्रिता। जलधिः प्रेम्णा तस्याः कण्ठे रत्नावलीराबबन्ध। समुद्रे स्थिता नागाः श्रीकृष्णं दृष्ट्वा भक्त्या हरेर्ध्वजानिव गरीयसा निःश्वसितानिलेन पयांसि उच्चैरुत्क्षिप्तवन्तः। अम्बुधिः प्रलयबान्धवं श्रीकृष्णं दृष्ट्वा हर्षितो भवति। लतावृक्षयोः दम्पतिरूपेण चित्रणं यथा –

वनस्पतिस्कन्धनिषण्णबालप्रबालहस्ताः प्रमदा इवात्र।
पुष्पेक्षणैर्लम्भितलोचकैर्वा मधुव्रतव्रातवृतैर्व्रतत्यः।।[16]

अत्र लतासु अङ्गनानामारोपः कृतः।

अपशङ्कमङ्कपरिवर्तनोचिताश्चलिताः पुरः पतिमुपैतुमात्मजाः।
नुरोदितीव करुणेन पत्रिणां विरुतेन वत्सलतयैष निम्नगाः।।[17]

पतिगृहं गच्छन्तीं नदीरूपिणीं पुत्रीं दृष्ट्वा नगः पक्षिणां विरुतच्छलेन अनुरोदिति पितृवत्।
विलासिनीनां कर्णावतंसीभूतं नीलोत्पलं तासामक्षिसौन्दर्येण पराजितं सल्लज्जामनुभवति।

उत्क्षिप्तस्फुटितसरोरुहार्घ्यमुच्चैः सस्नेहं विहगरुतैरिवालपन्ती।
नारीणामथ सरसी सफेनहासा प्रीत्येव व्यतनुत पाद्यमूर्मिहस्तैः।।[18]

उत्क्षिप्तं स्फुटितसरोरुहं विकचारविन्दमेवार्घ्यमर्घ्यद्रव्यं यस्मिंस्तत्तथा सस्नेहं विहगरुतैरालपन्ती स्वागतादिवचनं व्याहरन्तीव स्थिता। फेन इव हासस्तेन सहिता सफेनहासा। स्मितपूर्वाभिभाषिणीत्यर्थः। सरसी पुष्करिणी नारीणामूर्मिभिरेव हस्तैः पाद्यं पादोदकं व्यतनुत।

पर्यच्छे सरसि हतेऽशुके पयोभिर्लोलाक्षे सुरतगुरावपत्रपिष्णोः।
सुश्रोण्या दलवसनेन वीचिहस्तन्यस्तेन द्रुतमकृताब्जिनी सखीत्वम्।।[19]

कमलिनी रमण्याः सखीत्वं करोति।

अनुरागवन्तमपि लोचनयोर्दधतं वपुः सुखमतापकरम्। निरकासयद्रविमपेतवसुं वियदालयादपरदिग्गणिका।।[20]

धनपरा हि वेश्या निर्गुणमपि धनिकमासर्वस्वहरणादत्यनुरक्तवदनुवर्तन्ते, गुणवन्तमपि हतस्र्वस्वं निर्वासयन्ति सद्य एव। तथैव पश्चिमदिशा अपेतवसुं सूर्यं निष्कासितवती।

उदयमुदितदीप्तिर्याति यः संगतौ मे
पतति न वरमिन्दुः सोऽपरामेष गत्वा।
स्मितरुचिरिव सद्यः साभ्यसूयं प्रभेति
स्फुरति विशदमेषा पूर्वकाष्ठाङ्गनायाः।।[21]

य इन्दुः मे मम संगतावुदितदीप्तिः प्रबुद्धद्युतिः सन् उदयमुदयाद्रिम्अभ्युदय ,ञ्च याति स इन्दुरेषोऽपरां पश्चिमाशां ,पराङ्गनां च गत्वा पतत्यस्तमेति , पातित्यञ्च गच्छति। न वरम्। अनर्हमित्यर्थः। इति सद्यः साभ्यसूयं यथा तथा पूर्वकाष्ठा प्राची सैवाङ्गना, पूर्वनायिका च गम्यते।तस्याः स्मितरुचिर्मन्दहासकान्तिरिवैषा प्रभा विशदं निर्मलं स्फुरति प्रकाशते। प्राच्यामीषद्विशदा प्रभा प्रादुरभूदित्यर्थः।

शिशिरकिरणकान्तं वासरान्तेऽभिसार्य
श्वसनसुरभिगन्धिः साम्प्रतं सत्वरेव।
व्रजति रजनिरेषा तन्मयूखाङ्गरागैः
परिमलितमनिन्द्यैरम्बरान्तं वहन्ती।।[22]

एषा रजनिर्वासरान्ते रात्रौ शिशिरकिरणचन्द्रस्तमेव कान्तमभिसार्याभिसृत्य साम्प्रतं श्वसनैस्तत्कालवातैर्निवासैश्च सुरभिगन्धिः सुगन्धिः अनिन्द्यैर्मनोहरैर्मयूखैरे- वाङ्गरागैः परिमलितं व्याप्तं वासितं चाम्बरान्तं नभःप्रान्तं वस्त्रान्तञ्च वहन्ती भजन्ती सत्वरेव व्रजति।
पद्येऽस्मिन् सन्ध्याया बालिकारूपेण चित्रणं कृतम् –

अरुणजलजराजीमुग्धहस्ताग्रपादा
बहुलमधुपमालाकज्जलेन्दीवराक्षी।
अनुपतति विरावैः पत्रिणां व्याहरन्ती
रजनिमचिरजाता पूर्वसन्ध्या सुतेव।।[23]

अचिरजाता सद्योभवा बाला पूर्वसन्ध्या सुतेव पुत्रीव रजनिमनुधावति। एवमेव आकाशस्य मातृरूपेण बालसूर्यस्य च पुत्ररूपेण चित्राङ्कनं द्रष्टव्यम् –

उदयशिखरिश्रृङ्गप्राङ्गणेष्वेष रिङ्गन्
सकमलमुखहासं वीक्षितं पद्मिनीभिः।
विततमृदुकराग्रः शब्दयन्त्या वयोभिः
परिपतति दिवोऽङ्के हेलया बालसूर्यः।।[24]

एष बाल उदितमात्रः। बालश्चासौ सूर्यश्च बालसूर्य उदयशिखरिश्रृङ्गस्योदयाद्रिशिखरस्य प्राङ्गणेषु रिङ्गन् सञ्चरन् पद्मिनीभिर्नलिनीभिः स्त्रीविशेषैश्च। कमलान्येव मुखानि तेषां हासेन विकासेनहास्येन , च सह यस्मिन्कर्मणि तद्यथा तथा वीक्षितः सन्। वयोभिः पक्षिभिः शब्दयन्त्याः शब्दं कुर्वन्त्या दिवोऽन्तरिक्षस्य मातुश्चाङ्के समीपे उत्सङ्गे ,च विततानि प्रसृतानि मृदूनि कराग्राणि किरणाग्राणि हस्ताग्रे च यस्य सन् हेलया लीलया परिपतति। चन्द्रस्य उपपतिरूपेण निरूपणं कृतम्–

क्षणमतुहिनधाम्नि प्रोष्य भूयः पुरस्ता-
दुपगतवति पाणिग्राहवद्दिग्वधूनाम्।
द्रुततरमुपयाति स्त्रंसमानांशुकोऽसा-
वुपपतिरिव नीचैः पश्चिमान्तेन चन्द्रः।।[25]

अतुहिनधाम्नि उष्णांशौ दिशो वध्व इवेत्युपमितसमासः। तासां दिग्वधूनां पाणिं गृह्णातीति पाणिग्राहो निजभर्ता तस्मिन्निव पाणिग्राहवत् क्षणं प्रोष्य प्रवासं कृत्वा भूयः पुनरपि पुरस्तात्पूर्वस्यां दिशि मार्गे चोपगतवत्यागतवति सति असौ चन्द्र उपपतिर्जार इव स्त्रंसमानांशुको गलद्रश्मिकः स्त्रस्तवस्त्रश्च नीचैर्नम्रः सन्पश्चिमान्तेन पश्चिमदिक्कोणेन केनचिदपरद्वारेण द्रुततरमपयात्यपसरति। तथा पूर्वद्वारेण निजपतावागतेः पश्चान्मार्गेणोपपतिरपसरति तद्वदित्यर्थः।

– अम्भोधिः स्त्रीभिः सह विहर्तुं मर्यादां लङ्घयति

गाम्भीर्यं दधदपि रन्तुमङ्गनाभि संक्षोभं जघनविघट्टनेन नीतः।
अम्भोधिविकसितवारिजाननोऽसौ मर्यादां सपदि विलङ्घयाम्बभूव।।[26]

एवं महाकविमाघस्य विविधशास्त्रेषु पाण्डित्यं प्रशंसनीयम्। कविना विषयानुसारं सर्वेषां शास्त्राणां सूक्ष्मज्ञानं प्रकटितं येन पाठकाः चमत्कृता भवन्ति।

## सन्दर्भ


1. शिशु.3.73
2. शिशु.4.3
3. शिशु.4.46
4. शिशु.6.2
5. शिशु.6.27
6. शिशु.6.54
7. शिशु.9.3
8. शिशु.9.8
9. शिशु.9.9
10. शिशु.9.12
11. शिशु.9.30
12. शिशु.11.22
13. शिशु.11.44
14. शिशु.11.45
15. शिशु.11.49
16. शिशु.4.35
17. शिशु.4.47
18. शिशु.8.14
19. शिशु.8.47
20. शिशु.9.10
21. शिशु.11.12
22. शिशु.11.21
23. शिशु.11.40
24. शिशु.11.47
25. शिशु.11.65
26. शिशु.8.26